शि. प्र. मंडळी, पुणे ९.
मीमांसा विद्यालय
卐 ग्रंथालय 卐
ग्रंथ नाव अद्वैत जल जात.
लेखक पंडित नारायण पांडुरंग

मि ३३
१८६

116

॥ अथाद्वैतजलजातप्रारंभः ॥ श्रीवो ॥ पत्रें १ ॥

मि ३३
७८६

श्रीगणेशायनमः ॥ श्रीशङ्करदेशिकेश्वरायनमः ॥ श्रीसच्चिदानंदायपरमात्मनेनमः ॥ शिवमस्तुसदा ॥ श्रीशारदाचार्यवरप्रत्यक्सच्चि
त्सुखाद्वयंब्रह्म ॥ नत्वासम्भिन्नतयाविकाश्यतेऽद्वैतजलजातं ॥ १ ॥ शिवोऽहमोम् ॥ इहकश्चित्कलिकालभुकवसारिश्रमेभूरिभीतोंतेवा
सीयुक्तोपचारकरःसकलवेदार्थवित्तममात्तकामंकरुणैकरूपिणमाचार्यचूडामणिंचरणानन्यशरणत्याद्यावरणीकृत्यभक्त्यवनिष्ठन्न
यिनिर्विकल्पकल्पतरोसद्गुरोऽस्मात्संसारात्सारस्त्रोनोपदेशपूर्वकंमोचयमोचयेतिगलल्लोचनजलौघाम्बाञ्चकार ॥ तंसदयैकबु
ध्यिनञ्चिन्नतःसमुपादिदेश ॥ देशिकेशोमहावाक्यंतत्त्वमसीति ॥ अस्यायमर्थः ॥ यतोवाइमानिभूतानिजायंते ॥ येनजातानिजीवंति ॥ यत्प्रयं
त्यभिसंविशंति ॥ तद्विजिज्ञासस्व ॥ तद्ब्रह्मेति ॥ इत्यादिश्रुतिभिः ॥ अहमात्मागुडाकेशसर्वभूताशयस्थितः ॥ अहमादिश्चमध्यंचभूताना
मंतएवचेत्यादिस्मृतिभिश्चाविभ्वोत्पत्तिस्थितिलयकारणत्वरूपतटस्थलक्षणलक्षितं ॥ सत्यंज्ञानमनंतंब्रह्मेत्यादिश्रुतिभिः अनादिमत्परंब्र
ह्मेत्यादिस्मृतिभिश्चपरिच्छेदत्रयशून्यविशुद्धचैतन्यनिरतिशयानंदघनत्वरूपस्वरूपलक्षणलक्षितंयत्परंब्रह्मतद्भागत्यागलक्षणयात ३
त्पदवाच्यार्थभूतमंबरमिवकालविशेषावच्छिन्नस्वाज्ञानेनगंधर्वनगरस्यसुप्तदेवदत्तइवस्वप्नस्थमायाकारपरिणतस्वाज्ञानवशात्स्वप्नप्रपंचस्य

मात्मा स्वतःसिद्ध एव कालत्रयं अस्तेर्वर्त्तमान इत्यर्थः ॥ तथा चोक्तं श्रीमत्पद्मपादाचार्यपादपद्मैः श्रीशारीरकभाष्यप्रथमटीकायां पंचपादिका
व्याख्यायां ॥ अस्य शास्त्रस्यैदंपर्यं ॥ सुखैकतानसदात्मकूटस्थचैतन्यैकरसतासंसारित्वाभिमतस्यात्मनः पारमार्थिकं स्वरूपमिति वेदान्ताः
पर्यवस्यंतीति प्रतिपादितमिति ॥ ॥ इति द्वितीयजलजाते प्रथमा दलावलिः ॥ ॥ श्रीशं वंदे ॥ इति निर्दिष्टनादिष्टानि दृष्ट्वापि स्वकीयपरमे
ष्टे ॥ देहाभिनिविष्टत्वात्स्वानुष्टिं मार्गमाचष्टे ॥ १ ॥ अयेदयामयाचार्यवर्य योयमखंडैकरसात्मको वाक्यार्थः कथितः परंतु विनायुक्तिमसौम
ह्यं धिस्थो न भवतीति तद्विवरणमनुसरणीयं करुणया ॥ यतः सर्वेषां श्रुतिशिरसां भवतु नाम द्वैते ब्रह्मणि तात्पर्यपर्यवसानं प्राचीनाचार्यचरण
वचनात् ॥ तथापि ब्राह्मणोहं ब्रह्म कथं भवामि ॥ ननु केन कथितं ब्राह्मणस्य ब्रह्मभवनं । प्रत्युत तत्त्वंपदार्थवाच्यांशस्य मिथ्यात्वनिश्चयेन ब्राह्मणत्वजा
तिमत्स्थूलशरीरत्वान्नमयकोशस्य बाध एव कथित इति चेन्न ॥ अहं ब्राह्मण इत्यनुभवस्य केनापि बाधानापत्तेः ॥ नहि श्रुतिशतमपि घटं पटयितुमीष्टे ॥
ननु स्वप्ने यथाऽहं राजेत्यनुभवस्य जाग्रति बाधो दृष्टस्तथा स्यादिति चेन्न ॥ अत्र तथा बाधोत्तरं ब्राह्मणत्वाभावाप्रतीतेः ॥ ननु तत्त्वप्रमेयासंभावनादि
शालिनस्तदप्रतीतावपि तद्विदां तु प्रतीयत एवेति चेन्न ॥ तथात्वे ब्रह्मोपदेष्टृत्वादिव्यवहारोच्छेदादनिर्मोक्षप्रसंगः ॥ तस्मात्त्वं कि २
मत्र तात्पर्यं नह्ययो दीर्यतामार्यैः ॥ आकलय बालक ॥ किमिति ब्राह्मणत्वादिजातिमति देह एव संदिहानोसि ॥

या जगज्जननपालनविलयनानां जीवाश्रितस्वविषयकाविद्याकामकर्मादिना अभिन्ननिमित्तोपादानत्वञ्चा शुद्धसत्वप्रधानाविद्याप्रतिबिंबरू
पेश्वरत्वं मिथ्यात्वदृष्टतमानिश्चयरूपत्यागविषयं मृगतोयवत्त्वात् तत्पदलक्ष्यार्थभूतं असज्जडदुःखपरिच्छिन्नविरोधित्वात्सत्यज्ञानानंदानंतं
ब्रह्मत्वं ॥ जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचं यत्प्रकाशते ॥ तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यते इत्यादिश्रुतिभिः ॥ यथा प्रकाशयत्येकः कृत्स्नं लो
कमिमं रविः । क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत इत्यादिस्मृतिभिश्च ॥ जाग्रत्स्वप्नसुषुप्तिकारणत्वरूपतटस्थलक्षणलक्षितः ॥ त्रिषु
धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् ॥ तेभ्यो विलक्षणः साक्षी चिन्मात्रोहं सदाशिवः इत्यादिश्रुतिभिः ॥ नित्यः सर्वगतः स्थाणुरचलोयं स
नातनः ॥ अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते इत्यादिस्मृतिभिश्च ॥ परिच्छेदत्रयशून्यविशुद्धचैतन्यानिरतिशयानंदघनत्वरूपस्वरू
पलक्षणलक्षितः आत्मा ॥ निरुक्तलक्षणया त्वंपदवाच्यार्थभूतमन्नमयप्राणमयमनोमयविज्ञानमयानंदमयाख्यपंचकोशात्मक
स्थूलसूक्ष्मकारणशरीरतन्निष्ठजाग्रदाद्यवस्थात्रयस्य रज्जुखंडमिव स्वाज्ञानवशाद्धारोरगादेरभिन्ननिमित्तोपादानत्वशालिम
मलिनसत्वप्रधानाविद्याप्रतिबिंबरूपजीवत्वं दित्वात् तंपदलक्ष्यार्थभूतः सच्चिदानंदानंतप्रत्यक्कूटस्थैकरसः साक्षित्वोपलक्षितः आ
त्मा ॥ असि । यावद्दृश्याख्याविद्यातत्कार्यद्वैतप्रपंचरूपबंधध्वंसाभिन्नमोक्षस्वरूपः स्वप्रकाशसुखसीमाऽखंडैकरसभूमा निर्द्दिष्टेतः पर

SHIKSHANA ... ASARAKA M...
MIM...
VID...

वस्तुविषयत्वेन चारितार्थ्यात्॥ नहि वेदांतानामपि व्यावहारिकवस्तुतः पातित्वेन परमार्थवस्त्वद्वैतबोधकत्वं न स्यात् तथा च तस्यावाङ्मनस
गम्यत्वादूपितं न स्यादिति चेन्मैवं॥ स्वप्ने व्याघ्रभीत्या पलायमानस्य निरुद्धतस्तत्रैवं त्वं स्वप्नमिमं पश्यसि देवदत्तोसि प्रबुद्धो भवेति मि
त्रवाक्यस्य स्वप्नापेक्षया पारमार्थिकसुखसुप्तदेवदत्तस्वरूपबोधकत्ववदुपपत्तेः॥ तत्वोपनिषदमिति समाख्यया निरुक्तलक्षणाव
स्थानिर्विषयाविषयकत्वस्यापि संभवाच्च॥ ननु कल्पितमप्यकल्पितबोधकं चेद्यावद्दृश्यस्य कल्पितत्वात्तदेव अज्ञानबोध इत्यव्यवस्थे
ति॥ अत्रैव त्र अव्यवस्थां स्वास्थ्येन सास्थः सन्॥ कल्पितत्वसाम्येपि स्वप्ने यथा मित्रवाक्यमेव व्याघ्रभीतिनिवर्तकं तथात्र वरद्विद्यामा
त्रकल्पिते आकाशादिसकलप्रपंचे गुरूक्तवेदांतजन्यज्ञानेनैवाविद्याध्वस्तिपूर्वकं स्वरूपानंदावाप्तिरितिराद्धांतः॥ उक्तं हि श्रीम
त्सर्वज्ञात्ममुनिपन्नालिनेः संक्षेपशारीरकद्वितीयाध्याये॥ परिकल्पितोपि सकलज्ञतया गुरुरेव पूर्णमवबोधयति॥ परिकल्पितो
पि मरणाय भवेदुरगो यथा ननु न भो नलिनामिति॥ ननु यदि मदविद्यामात्रनिबंधनः सर्वोपि प्रपंचश्चेच्छुकादीनां मुक्तिः कथमिति चे ३
त् किमत्रानुपपन्नं यथा विद्वत्तेनाचार्यैः कल्पितस्तथा तेपि मुक्तत्वेनेति सर्वमवदातं॥ एतदप्युक्तमेतेनैव। मुक्तामुक्तौ विद्वदज्ञौ त्वद

धाजमजननपालनविलयनानां जीवाश्रितस्वविषयकाविद्याकामकर्मादिनादो नोसि ॥ पश्यधावदृश्यमिथ्यात्वं ॥ तथाहि ॥ पंचकोशाः मिथ्याभूताः अना
त्मत्वात् स्फटिकरजतवत् ॥ तथा च त एव अनात्मानः दृश्यत्वात् घटवत् ॥ त एव च दृश्याः ममतास्पदत्वात् सदनवत् ॥ ममतास्पदत्वं तु मम देहो मम
प्राणो मम मनो मम बुद्धिर्ममानंद इत्याबालकमलासनमविवादं ॥ तस्मात्तु सुषुप्तौ वे तावत्कालं ममानंदः स्थित इति जाग्रद्देहादिसो सुषुप्तसुखोत्तसा
क्षी निरुक्तदृश्यसाक्षितो पलक्षितः सच्चिदानंदः असज्जडदुःखभिन्नत्वात् ॥ यथाशोधिततत्पदार्थीभूतं ब्रह्म । यद्वाय नैवं तत देवं यथा घटः
सो सुषुप्तसुखाभासादिश्च ॥ अयमेव न्यायः समष्टिदेहत्रये ब्रह्मांडसूत्राव्याकृताख्येपि ज्ञेयः । इदानीं वाच्यद्वयकारणं यदनाद्यनिर्वचनीयम
ज्ञानं तदपीत्थं पंचकोशनिरासो नरः कस्त्वमिति पृष्टे मामहं न जानामीत्यात्मेकाश्रयविषयं दृश्यत्वेन मिथ्येति प्रसिद्धतममेव ॥ तस्मान्निरस्तासं
भावनादेर्विचारितत्त्वमस्यादिवाक्येकजन्याद्वैतब्रह्मसाक्षात्कारेण स्त्रगनतिरिक्तसर्पध्वंसवदद्वैतात्ममात्रेन ध्वंसे सत्यपि तत्त्वविदो याव
त्प्रारब्धं तत्कार्यीभूतसोपाधिकभ्रमात्मकदेहत्रयप्रमुखद्वैतप्रतिभासस्त्वादर्शप्रतिफलितनगरवदुपपद्यत एव ॥ एतेन यदुक्तं तत्त्वावि
दं प्रात्मण त्वाद्यनुभवाभावप्रतीतौ संप्रदायाभावाद निर्मोक्ष इति तदपास्तं ॥ निरुक्तानुभवादेः सत्त्वेत्वेनाप्रतीयमानत्वेपि मिथ्यात्वेन
भानानुवृत्तेः ॥ समाधौ तु तस्या अप्यभाव इति त्वां तो भवांतेवासिनू ॥ ननु तर्हि वेदांते तरप्रमाणानां वैयर्थ्यमिति चेन्न ॥ व्यावहारिक

भासापिचाग्निः क्वचिदुदेतीति व्याप्तिविरुद्धमपि स्वीकर्तव्यं ॥ न ॥ यथा सूर्यादिषु मुखे चक्षुषि सूर्यादिप्रतिबिंबास्थितोप्याकिंचित्करः सूर्यादिप्रकाशने
तस्य तेजोमयत्वात् ॥ तथा महावाक्यजन्यायामखंडाकारवृत्तौ स्थितोपि स्वप्रकाशप्रत्यक्प्रतिबिंबस्तत्स्फोरणे शिथिलचरण एवेति न को
पि विरोधलेशः ॥ ॥ इत्यद्वैतजलजातेद्वितीयादलावलिः ॥ ॥ श्रीशंवंदे ॥ इत्थं विरुद्धोस्ति धीविशुद्धबुद्धात्ममात्रबोधेऽधा ॥
न साधनमवबोद्धुं विदधे गुणिसुधीधीरः ॥ १ ॥ भो भो भवभयभंजनकरकलितमानां जनानिरंजनरंजनघृणाऽमृतघूर्णेदोन्निकन्निखा-
मणे योयमुक्तरीत्याध्वस्तविरोधोऽद्वैतात्मतत्त्वबोधः श्रुत्यंतवाक्यैककरणकः करुणया वितरणतां नीतः परं त्वसौ मदविद्याध्वस्तये तर
ग बहिरंगसाधनज्ञानं तदनुष्ठानं विना जीवन्मुक्तये च नालमिति तदष्टनवृष्टिरनुष्ठेयाचिरात्प्रविशिष्टैः ॥ अवधारय सद्गुणनिधे ॥ काम्यनि
षिद्धरोधपूर्वकं फलेच्छाकर्तृत्वाद्यभिमानशून्यमंतर्यामीश्वरार्पणबुद्ध्याऽनंतजन्मसु नित्यनैमित्तिकस्ववर्णाश्रमोचितकर्मानुष्ठा
नं बहिरंगसाधनं चित्तशुद्धिफलकं ॥ ततस्तत्कार्यं नित्यानित्यविवेकादिसाधनचतुष्टयमंतरंगसाधनं ॥ ततोंतरंगतरं श्रवणा
दित्रयं चतुर्लक्षण्याः पंचविधप्रतिबंधविध्वंसकं ॥ ततोंतरंगतमं विचारितं श्रुत्यंतमहावाक्यमात्रमिति ॥ ननु ४
कोयं पंचविधः प्रतिबंधः ॥ अनुसंधेहि ॥ विषयवासनाप्रमाणप्रमेयासंभावनासाधनफलविपरीतभावनाभेदात्पंचधा प्रतिबंधः ॥

न्याचाकाशादि सूमावसानं च विश्वं ॥ स्वाविद्योत्थत्वात्तन्निष्यंदनं तद्धित्वा न तथ्यं मा गृहीरन्यथैतदिति ॥ तस्मात्कल्पितोपि वेदांतः स्वात्मानं बोध
यतीति सिद्धं ॥ ननु निरुक्तयुक्त्या यद्यप्युपनिषदेकवाग्विषयत्वं यन्निरस्तं ब्रह्मण स्तथापि यन्मनसा न मनुते येनाहुर्मनो मतं ॥ तदेव ब्रह्म
त्वं विद्धि नेदं यदिदमुपासत इत्यादिश्रुतेर्मनोविषयत्वं यन्निरस्तं तत्सत्वे निरुक्तवाचापि कथमद्वैतबोधसिद्धिः स्यादिति चेन्न ॥ मनसैवेद
माप्तव्यं दृश्यते त्वग्र्यया बुद्ध्येत्यादिश्रुतिभिः शुद्धनिरुद्धनिरुक्तमहावाक्यार्थाकारपरिणतबुद्धिगम्यत्वस्याप्युपपादितत्वात् ॥ ननु किमे
तावता यन्मनसेति मनसैवेत्यादिश्रुतिविरोधस्त्वपरो दोषः ॥ शृणु वत्सात्राकूतं ॥ ज्ञानतावच्छिन्नेयावज्ज्ञाने व्याप्तिद्वयं वर्त्तते ॥ एका वृत्तिव्या
प्तिरपरा फलव्याप्तिः ॥ तथा चात्र वृत्तिव्याप्तिस्वीकाराभिप्राया मनसैवेत्यादिश्रुतिः ॥ फलव्याप्तिनिरासस्वारस्यायन्मनसेत्यादिश्रुतिः ॥ न
न्विति कल्पने किंमानं ॥ ज्ञानतावच्छेदेनाद्वैतब्रह्मज्ञानमपि ज्ञानमेवात्रापि कुतो नोभयं ॥ यदि वृत्तिरेव जायते फलं तु तत्रैव जायते इति निय
म्यते चेदपूर्वमिदं ॥ या या वृत्तिः सा चित्प्रतिबिंबविशिष्टैवोत्पद्यते यथा यो यो घटः समुत्पद्यते स साकाशोतः पूर्वोक्तश्रुतिविरोधतादवस्थ्य
मेवेति चेदुच्यते ॥ यथा हि लोके व्यावहारिकस्वप्रकाशाख्या कीदिवस्त्ववल्लोके यावद्रूपग्रहणे सहकृतालोकमसमर्थमपि चक्षुः
केवलमेव कुशलं भवति तथा पारमार्थिकस्वप्रकाशे ब्रह्मात्मनि किमपराद्धमेकया वृत्तिव्याप्त्यैवाज्ञाननाशाय ॥ ननु तर्हि निरा

वाप्रयत्नेनावस्थानमिति। ननु वाक्यार्थोऽयः पूर्वमुक्तः स किं प्रमुषितनिःशेषविशेषो वा सत्सत्वादिधर्मविशिष्टो वा। आद्ये स
त्यं ज्ञानमित्यादिश्रुतिवैयर्थ्यं। द्वितीये तु निर्गुणत्वक्षतिरिति चेन्न। अतद्व्यावृत्तिविरोधित्वबोधकत्वेन श्रुतिसांगत्यात्। तथा चो
क्तं श्रीमत्संक्षेपशारीरकाचार्यचरणैः। अचलजडविमुक्तदुःखतुच्छासहनवपुः परमपदं मुरारेः। परिहृतसकलप्रपंच
मात्मानमवतद्बोहितमो निरस्य वाक्यादिति। नन्वथापि मुरारेरिति पदं प्रयुंजतां भगवद्भक्तिप्रबलनिष्ठावतामप्यभिमतेति
भाति। सत्यमेव। ईश्वरलीलाविग्रहहरिहरान्यतरस्वरूपानवरतप्रेमग्राहिता तु पूर्वोक्तविरक्ततावत्साधनलक्षणभेदेनाव
विदितुं विदुषोः सिध्यत्येव। उक्तं हि श्रीमद्गीतासु तथाप्येतत्। चतुर्विधा भजंते मां जनाः सुकृतिनोऽर्जुन। आर्तो जिज्ञासु
रर्थार्थी ज्ञानी च भरतर्षभ। यो मद्भक्तः स मे प्रिय इत्यादि च। ननु मत्स्यादिवाक्येन तत्त्वमस्यादिवाक्ये च सर्वत्र लक्षणैव प्राय
शः स्वीक्रियते वेदांत इति सुखवृत्तिराहित्यमेव चेत् कृत्वा तु शाब्दात् परोक्षमेव ज्ञानं तत्त्वाभावात्। पश्चान्निदिध्यासनपरि
पाकादपरोक्षबोधोदयः किमिति नांगीक्रियते मणिपरीक्षणवदिति चेन्न। कौन्तेय स्त्वं दशमस्त्वमसी[illegible]त्यादौ शाब्द
परोक्षज्ञानस्यापि दर्शनात् तत्त्वाभाव्यहेतुना परोक्षमेव ज्ञानं शाब्दमिति सर्वधारणासिद्धेः। तत्र सुखपदवाच्य वलोभ[illegible]
क्ष

ननु विषयवासनानुसाधनचतुष्टयानि विरेहामुत्रार्थभोगविरागेणैव विनष्टेति किं चतुर्लक्षण्या श्रवणादिनेति चेन्न । फलीभूतवि
रागजननद्वारा चतुर्लक्षण्या श्रवणादेर्विषयवासनाबीजमर्जकत्वात् । तथा हि । यथा संन्यासो द्विविधः साधनफलभेदात् तथा वि
रागोऽपि । तत्र प्राक्तनेन विरागेण निरस्तापि विषयवासना साधनाऽध्यायानुसंधानजन्येन साधनेन विपरीतभावनानाशकेन नि
व॰ दिध्यासनेन फलतां नीतेन तेनैव सा निर्बीजीक्रियत इत्यर्थः हि । तथा च प्रमाणागसंभावनासाधनादि विपरीतभावनाभाव=
श्रुत्युर्मिध्ये समन्वयाविरोधयोर्म याक्रमं श्रवणमनननिष्ठाभ्यां साधनफलयोश्च निदिध्यासननिष्ठयास्तु संपाद इति ।
विस्फारितं चैवं बहिरंगादि सकलसाधनविधानकथाधारा श्रीमत्शंकरेश्वराचार्यचरणनलिनैर्नैष्कर्म्यसिद्धि प्रथमाध्याये ।
नित्यकर्मानुष्ठानाद्धर्मोत्पत्तिर्धर्मोत्पत्तेः पापहानिस्ततश्चित्तशुद्धिस्ततः संसारयाथात्म्यावबोधस्ततो वैराग्यं ततो मुमुक्षु
त्वं ततस्तदुपायपर्येषणं ततः सर्वकर्मतत्साधनसंन्यासस्ततो योगाभ्यासस्ततश्चित्तस्य प्रत्यक्प्रवणता ततस्तत्त्वमस्यादिवा=
क्यार्थपरिज्ञानं ततो विद्योच्छेदस्ततः स्वात्मन्येवावस्थानमिति । अस्यार्थश्चंद्रिकाकारेण दर्शितः । नित्यकर्मेति । धर्मोत्प
त्तिरदृष्टोत्पत्तिः । पापहानिर्धर्मेण पापमपनुदतीति श्रुतेः । चित्तशुद्धिश्चित्तस्य विवेकक्षमता । याथात्म्यावबोधः । अनित्य
त्वादिदोषदर्शनं । योगाभ्यासः श्रवणमनननिदिध्यासनादीनामनुष्ठानमत्र । चित्तस्य प्रत्यक्प्रवणता नाम प्रत्यगात्मनि

सुनामस्फुरणोत्थापकवाक्यवद्वेदांतानां किंचिदपि संबंधं विनैवासंगाद्वैतब्रह्मबोधकत्वमित्यादिकं । न च तत्तु व्यावहारिकदृष्टि
मवलंब्यैवेयं प्रक्रिया परमार्थदृष्ट्या तु न किंचिदेतत् । तथा चोक्तं दशश्लोक्यां श्रीमद्भगवत्पूज्यपादपादारविंदैः । नशा
स्ता नशास्त्रं नशिष्यो नशिक्षा न च त्वं न चाहं न चायं प्रपंचः ॥ स्वरूपावबोधो विकल्पासहिष्णुस्तदेकोवशिष्टः शिवः के
वलोहमिति ॥ यदुक्तं निदिध्यासनादेव भवत्यपरोक्षं मणिपरीक्षणवदिति तन्न ॥ तस्याप्रमाणत्वात् ॥ निदिध्यासनं नाम नि
र्गुणाहंग्रहोपासनापरपर्यायं ब्रह्माहमस्मीति विजातीयप्रत्ययानंतरितं तैलधारावत्सजातीयप्रत्यय
प्रवाहीकरणं ॥ तेन तु पूर्वोक्तविपरीतभावनाद्यभिनिरास एव स्यान्नतो महावाक्यात्सकलप्रमाणशिरोमणेरपरोक्षं ज्ञानं स
कार्यकाविद्यानिवर्तकमिति राजमार्गः ॥ उक्तलक्षणनिदिध्यासनाज्जातमप्यपरोक्षं ज्ञानं न प्रमात्मकं स्यात् कामुकस्य का
मिन्यापरोक्ष्यवत् ॥ मणिपरीक्षणे पि चित्तैकाग्र्येण द्व्यार्थसन्निकर्ष एव प्रत्यक्षकरणीभूतो जन्यते न तु प्रत्यक्षमित्यनु
भूतमेव ॥ तस्मादीश्वरचरणानन्यप्रेम्णा नित्याद्याचरणात्संप्राप्तसमाध्यंतसाधनजातमनुतिष्ठतां विचारिता महावाक्या
देव फलपर्यवसायी तत्त्वसाक्षात्कार इति सिद्धं ॥ इत्यद्वैतजलजाते तृतीयादलावलिः ॥ ॥ शिवोहमोम् ॥ ॥ ॥

अद्वैत

शयके। सत्तादिलक्ष्या ज्ञानोत्था सत्ताद्यर्थनिषेधधीः वस्तुनैव समा ज्ञोनिकेवलाज्ञानहानतः। एवं ज्ञातं विजानाति विमुक्तश्च विमुच्य
ते। निवर्तते निवृत्तेषु विर्वेः शपथयाम्यहं भिन्नि। ननु ज्ञानाद्भुक्तिमिति स्मृतेः कर्मणामनेकजन्मसंचितादीनां पुण्यपापात्मनां का गति
रिति चेच्छृणु। अनादिकालमारभ्य ज्ञानप्राक्क्षणपर्यंतं संचितानां तेषामद्वैतबुद्ध्यैव स्वाभाविककर्मणां जायद्बोधेनैव ध्वंसः
। ज्ञानोत्तरं स्वप्नसाम्यलोकदृष्ट्या भासमाने देहपतनपर्यंतं क्रियमाणानां तेषामसंभवो परानाड्गेवाश्लेषः। देहारंभक
योस्तु तयोः प्रातीतिकलौकिककाल्पनिकभोगादेव क्षय इति। किंचिद्रहस्यं। उक्तं हि चतुर्थाध्याये श्रीमद्बादरायणचरणकमलैः
तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्। इतरस्याप्येवमसंश्लेषः पाते तु। भोगेन त्वितरे क्षपयित्वा संपद्यत इ
ननु क्रियमाणाश्लेषे नित्यानां यावज्जीवं विहितानां स्वस्वाश्रमोचितानां कर्मणामनुष्ठानं न वा। उच्यते। अनेकविक्षेपवत्त्वा
ज्जीवन्मुक्तिसुखं सुदुर्लभं। अतो यथेष्टचेष्टेति चेन्न। प्रस्थानत्रयभाष्यादितात्पर्यपर्यालोचनया विदुषोपि कर्मसंन्यास
एवाधिकारात्। तथा चोक्तं श्रीविद्यारण्यगुरुभिर्वार्तिकसारे। अनन्यचित्ततां ब्रह्मनिष्ठासौ कर्मठः कथं। कर्मत्यागी ततो
ब्रह्मनिष्ठामर्हति नेतरः। इति। यत्तु यथेष्टचेष्टितिर्शौकिलं तन्न। असंभवात्। पामराणामपि स्वाभैव प्रवृत्तेः परं तु निरतिशयानंदस्ते

श्रीशं वंदे। इति सकलसाधनानां विधानमनुसंधत्स्व माधानं। नविना फलबोधनमिति तन्निष्ठोऽङ्‌ सावधानोऽस्तु ॥१॥ नमोन
मोऽस्त्वाचार्यचक्रवर्तिचरणाय यो मम्यमस्मभ्यं ससाधनोऽविरुद्धः फलभूतमबोधः समुपदिष्टः किमेतादृशाऽदरेण साधनसंपत्ता
संपादितेनानेन फलं भयात्। ननु प्रार्थितमेव फलं न विद्यानिवृत्तिपूर्वकं स्वरूपानंदप्राप्तिरूपं मुक्तिसंज्ञकमितिचेन्न। वि
कल्पासहत्वात् अविद्यानिवृत्तिः किमात्मस्वरूपाऽनात्मरूपा वा। नाद्यः। आत्मनो नाहि सिद्धत्वात् तत्प्राप्तिस्सिद्धैवेति विफलआ
यासोऽनुभवविरोधश्च। नान्त्यः। द्वैतापत्तेः। तथा स्वरूपानंदस्यापि स्वस्वरूपभूतत्वात्सर्वं प्राप्तमेव। यद्यप्राप्तमेवानेन प्राप्यत इ
ति चेन्न। स्वरूपत्वाभावद्वैतेनसङ्कुन्नस्य पिप्युगासंभवोऽपि। तस्मादिदं सर्वं तुषपेषणवन्महतः करणदोषेणाभातीति वसमाधः
श्रीमत्सद्गुरुजनविभुषाविशेषेणेषितस्य। अपवर्गरहस्य। सकार्यकाविद्यायानिवृत्तिस्तु प्रध्वंससंज्ञकोऽभावविशेषः।
स तु मीमांसकमतानुरोधेनाधिकरणात्मक एव। तथा च प्रध्वंसप्रभावो जन्यो ध्वनंतो अधिकरणरूप आश्रययत् तथाऽविद्याध्वं
सः किमिति न स्यात्। दृष्टं हि नैरंजनमिति न्यायो नवरंजनाभावस्य श्रुतिमात्ररूपत्वं। स्वरूपानंदावाप्तिरपि कौंतेयुताप्ति
वल्लित्यैनष्मांसाऽस्सिद्धैवानेन तन्निरस्तो सिद्धैवमवतीति सतु ध्यनां। तथा च श्रीमद्वार्तिककारचरणारेणुभिरुक्तं

ननुशौद्धेनानेषां विषयेषु प्रवृत्तिः। विदुषस्तु लोकरकलितविश्ववाद्गितदन्यपदार्थंस्मात्क्वेशेन। ननु तर्हि संस्कारैः कथं उक्तं याघात्म्ले पुछ
कृशनिचेदशानापृथग्[illegible]भिप्रायेणेतिधारोभव। इतदुक्तं विवरणे नवमवर्णके ऽर्थे भेद्य काशात्ममुनिवरश्चरणैः। ननु तत्त्वदर्शिनः
शास्त्रनियमाभावे यथेष्टाचरणं स्यात्। न हिताहितमातिपरिहारनिमित्तत्वादाचरणस्य त्वात्मन्येवानिरतिशयानंदमशेषानर्थ
निवृत्तिं च साक्षादनुभवतः साध्यपुरुषार्थप्रार्थनाभावात्कुतो यथेष्टाचरणप्रसंगइति। नाभिसंततत्वदीपुनरुक्ता। यथेष्टचे
ष्टानिवृत्त्यर्थत्वस्य शास्त्रीयो नियमइष्टश्च इति शंकते। नन्विति। चेष्टा नावश्यगाधीनेति प्रमत्यं। सकलानंदैकनीडं ब्रह्मात्म
त्वेनानुभवतः कृपसुराभिलाषो कृपद्रसन आहानाहीनेति इति। तस्माच्छरीरं केवलमितस्ततः स्थितिरस्पृतमशनायाशौ
चस्नानभैक्षादिमात्रमाचरतः जीवन्मुक्त्या विहरतः सतः नपर्वोक्तशंकावकाशलेशोपि इममेवविवरणाद्यभिप्रायं बो
धयतात्मानुभवदर्शकत्वाप्युक्तं दृष्यापरमतेन सानिदृशिरसाहृदंगितास्फुहरिः कृपाणुद्धमोयथेष्टाचरणेनतस्य
ययपास्तिचेत्तानविपाकितानि। किं पुनेवाश्लेषः पुण्यपापक्रियायायपृथ्वं रुफधुसंस्कारे सीति। पुण्येष्वत्यापापमनो
नैवमुक्तिः शास्त्रस्य प्रायशोयं निसर्गइति। नन्वत्र प्रायशोयं निसर्ग इति कुचिद्देनाद्वपरीनमपिप्रारब्धवशादंगी

अद्वैत

कृतमिति पुनरपि मनमाचरेत्पातक एव । न । अज्ञातपातकसंभावनाभिप्रायकत्वात्तस्य शास्त्रस्य । तथैव व्याख्यातं तैत्तिरीयोपनिषद्दीपिकाकारैः

श्रीमाधवाचार्यैः । संबंधग्रंथे च संगागतेन मानवधर्मेण तिस्कृतिवाक्यं । अस्मिन्नर्थे तु बहुतरं दुर्वादिनो मर्दनीयाः परं तु विस्तरभियेहोपर

म्यते स्माभिः । तस्मात्किं प्रजया करिष्यामो येषां नोयमात्मायं लोक इत्यादि श्रुतेरहमेव परं ब्रह्म वासुदेवाख्यमव्ययं । इति यावद्दृढो यस्य

तदा स एवातिवेद्यमुमुक्षुरित्यादि स्मृतेश्च गृहस्थादिरुत्तमः वैधसर्वकर्मत्यागरूपं श्रौतम वैराग्यपूर्वकं विद्वत्संन्यासकरणपरायणो भवितु

मर्हति कहोलकुसलयाज्ञवल्क्यवदिति श्रुतेश्चापि जन्मान्तरकृतसाधनसंन्यासेन गृहस्थादिरपि विद्यानुरक्तविरागधुरः सरं फलाख्यं

विद्वत्संन्यासं विधाय तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः । नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तदित्यादि श्रुतेरेवं तु सेः परं

बुध्वा संस्तभ्यात्मानमात्मना । जहि शत्रुं महाबाहो कामरूपं दुरासदमित्यादि स्मृतेश्च । अद्वैत[illegible]चिन्तावस्थितिरूपा जीवन्मुक्तिः अ

खंडानंदाव्यवधानेन संतानितमानिरतिशयदुःखध्वंसोपलक्षित निरतिशयसुखरूपत्वात् । अन्यथा विदेहमुक्तिवत् । व्य

तिरेके यत्नेवं तदेवं यथाशक्ति दृक्स्वाभास इति युक्तेश्चापि मनोनाशवासनाक्षयद्वारा स्वरूपानुसंधानेन स्वतोत्थानपरतोत्था ८

नस्वतः परतोत्थानशून्यात्मक पंचमी षष्ठी सप्तम्यन्यतमभूमिकास्थितिसाध्यजीवन्मुक्त्या स्वभावत एव विलसतीति सिद्धं ।

जलजातं

नहि यः प्रज्ञातचिंतामणिमालाशालीस एवतन्देवस्य वांतसिक्काशनलोल इति मुग्धैरपि श्रद्धेयमिति सर्वम विरुद्धं । तस्मान्नत्वमस्यादि
वाक्योत्थ सम्यग्धीजन्ममात्रतः । अविद्यासहकार्येव नासीदस्तिभाविष्यति इति भगवत्संकरेश्वराचार्यचरणवचनानुभवात्कालत्र
येपि द्वैतराहित्याद्द्वैतत्वेन शिलामोनमेवेति शिवम् । इति देशिकदिष्टदिशा शिवपदरजसा रूपाशतः शिष्यः । माधनयोगक्षे
मा इत्येव श्रमानिवृत्तो भूत् ॥१॥ श्रीमच्छंकरदेशिकेश्वरमुखाद्द्वैतविद्यागुरुन्किं कर्मो मित्र कथनवान्यथकथं सचिंतयाम्यल्प
धीः । सर्वत्रापदुरेव नित्यमहमस्म तद्धि चार्यैव ते राचार्य मे यिमाद्दशेषु चर्या किं नो विधेया भवेत् । इत्यादि विहारानेकोपह ॥२॥
सानतथा ते भ्रमरावनाव तसा: ॥ हरिहरगुरुपादगं तथापि जलजातं मयि स्वात्कृतत्वं पापि ॥३॥ इति श्रीमत्सद्वाक्यप्रमा
णक्षीरार्णवविहरणश्रीमदद्वैतविद्याद्दिरारमणश्रीमन्नारायणपंडितात्मज पांडुरंगविरचितं मद्धैतजलजातं संपूर्णतां गतं ॥